# tripurasundarIvedapAdastotram

# ત્રિપુરસુન્દરીવેદપાદસ્તોત્રમ્

## Document Information

Text title : Tripurasundari VedapAdastotram

File name : tripurasundarIvedapAdastotram.itx

Category : devii, dashamahAvidyA, stotra, shankarAchArya, devI

Location : doc_devii

Author : Adi Shankaracharya

Transliterated by : P R Ramamurthy

Proofread by : P R Ramamurthy

Source : (<a href="http://stotram.lalitaalaalitah.com/2011/02/tripurasundari-vedapadastotra.html">Gl

<a href="https://archive.org/stream/CompleteWorksOfSriSankaracharyaIn20Volumes1910Edition/WorksOfSri

Stotras1 page/n177/mode/2up">CompleteWorks</a>)

Acknowledge-Permission: lalitaalaalitah http://stotram.lalitaalaalitah.com

Latest update : July 8, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# ત્રિપુરસુન્દરીવેદપાદસ્તોત્રમ્

વેદપાદસ્તવં વક્ષ્યે દેવ્યાઃ પ્રિયચિકીર્ષયા ।
યથામતિ મતિં દેવસ્તન્નો દન્તિઃ પ્રચોદયાત્ ॥ ૧॥

અકિઞ્ચિત્કરકર્મભ્યઃ પ્રત્યાહૃત્ય કૃપાવશાત્ ।
સુબ્રહ્મણ્યઃ સ્તુતાવસ્યાં તન્નઃ ષણ્મુખઃ પ્રચોદયાત્ ॥ ૨॥

અકારાદિક્ષકારાન્તવર્ણાવયવશાલિની ।
વીણાપુસ્તકહસ્તાઽવ્યાત્ પ્રણો દેવી સરસ્વતી ॥ ૩॥

યા વર્ણપદવાક્યાર્થગદ્યપદ્યસ્વરૂપિણી ।
વાચિ નર્તયતુ ક્ષિપ્રં મેધાં દેવી સરસ્વતી ॥ ૪॥

ઉપાસ્યમાના વિપ્રેન્દ્રૈઃ સન્ધ્યાસુ ચ તિસૃષ્વપિ ।
સદ્યઃ પ્રસીદ મે માતઃ સન્ધ્યાવિદ્યે સરસ્વતી ॥ ૫॥

મન્દા નિન્દાલોલુપાઽહં સ્વભાવાત્
એતત્સ્તોત્રં પૂર્યતે કિં મયેતિ ।
મા તે ભીતિર્હે મતે ત્વાદૃશાનામ્
એષા નેત્રી રાધસા સૂનૃતાનામ્ ॥ ૬॥

તરઙ્ગભૃકુટીકોટિભઙ્ગ્યા તર્જયતે જરામ્ ।
સુધામયાય શુભ્રાય સિન્ધૂનાં પતયે નમઃ ॥ ૭॥

તસ્ય મધ્યે મણિદ્વીપઃ કલ્પકારામભૂષિતઃ ।
અસ્તુ મે લલિતાવાસઃ સ્વસ્તિદા અભયઙ્કરઃ ॥ ૮॥

કદમ્બમઞ્જરીનિર્યદ્વારુણીપારણોન્મદૈઃ ।
દ્વિરેફૈર્વર્ણનીયાય વનાનાં પતયે નમઃ ॥ ૯॥

તત્ર વપ્રાવલીલીલાગગનોલ્લઙ્ઘિગોપુરમ્ ।
માતઃ કૌતૂહલં દદ્યાત્સુહાર્યં નગરં તવ ॥ ૧૦॥

મકરન્દઝરીમજ્જન્મિલિન્દકુલસઙ્કુલામ્ ।
મહાપદ્માટવીં વન્દે યશસા સમ્પરીવૃતામ્ ॥ ૧૧॥

તત્રૈવ ચિન્તામણિધોરણોઽર્ચિભિર્-
વિનિર્મિતં રોપિતરત્નશ ृઙ્ગમ્ ।
ભજે ભવાની ભવનાવતંસમ્
આદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૧૨॥

મુનિભિઃ સ્વાત્મલાભાય યચ્ચક્રં હૃદિ સેવ્યતે ।
તત્ર પશ્યામિ બુધ્યા તદક્ષરે પરમે વ્યોમન્ ॥ ૧૩॥

પઞ્ચબ્રહ્મમયો મઞ્ચસ્તત્ર યો બિન્દુમધ્યગઃ ।
તવ કામેશિ વાસોઽયમાયુષ્મન્તં કરોતુ મામ્ ॥ ૧૪॥

નાનારત્નગુલુચ્છાલીકાન્તિકિમ્મીલિતોદરમ્ ।
વિમૃશામિ વિતાનં તેઽતિશ્લક્ષ્ણમતિલોમશમ્ ॥ ૧૫॥

પર્યઙ્કતલ્પોપરિ દર્શનીયં
સબાણચાપાઙ્કુશપાશપાણિમ્ ।
અશેષભૂષારમણીયમીડે
ત્રિલોચનં નીલકણ્ઠં પ્રશાન્તમ્ ॥ ૧૬॥

જટારુણં ચન્દ્રકલાલલામમ્
ઉદ્વેલલાવણ્યકલાભિરામમ્ ।
કામેશ્વરં કામશરાસનાઙ્કં
સમસ્તસાક્ષિં તમસઃ પરસ્તાત્ ॥ ૧૭॥

તત્ર કામેશવામાઙ્કે ખેલન્તીમલિકુન્તલામ્ ।
સચ્ચિદાનન્દલહરીં મહાલક્ષ્મીમુપાસ્મહે ॥ ૧૮॥

ચારુગોરોચનાપઙ્કજમ્બાલિતઘનસ્તનીમ્ ।
નમામિ ત્વામહં લોકમાતરં પદ્મમાલિનીમ્ ॥ ૧૯॥

શિવે નમન્નિર્જરકુઞ્જરાસુર-
પ્રતોલિકામૌલિમરીચિવીચિભિઃ ।
ઇદં તવ ક્ષાલનજાતસૌભગં
ચરણં નો લોકે સુધિતાં દધાતુ ॥ ૨૦॥

કલ્પસ્યાદૌ કારણેશાનપિ ત્રીન્

સ્રષ્ટું દેવિ ત્રીન્ગુણાનાદધાનામ્ ।
સેવે નિત્યં શ્રેયસે ભૂયસે ત્વા-
મજામેકાં લોહિતશુક્લકૃષ્ણામ્ ॥ ૨૧॥

કેશોદ્ભૂતૈરદ્ભુતામોદપૂરૈ-
રાશાવૃન્દં સાન્દ્રમાપૂરયન્તીમ્ ।
ત્વામાનમ્ય ત્વત્પ્રસાદાત્સ્વયમ્ભૂ-
રસ્માન્માયી સૃજતે વિશ્વમેતત્ ॥ ૨૨॥

અર્ધોન્મીલદ્યૌવનોદ્દામદર્પાં
દિવ્યાકલ્પૈરર્પયન્તીં મયૂખાન્ ।
દેવિ ધ્યાત્વા ત્વાં પુરા કૈટભારિ-
ર્વિશ્વં બિભર્તિ ભુવનસ્ય નાભિઃ ॥ ૨૩॥

કહ્લારશ્રીમઞ્જરીપુઞ્જરીતિં
ધિક્કુર્વન્તીમમ્બ તે પાટલિમ્ના ।
મૂર્તિં ધ્યાત્વા શાશ્વતીં ભૂતિમાય-
ન્નિન્દ્રો રાજા જગતો ય ઈશે ॥ ૨૪॥

દેવતાન્તરમન્ત્રૌઘજપશ્રીફલભૂતયા ।
જાપકસ્તવ દેવ્યન્તે વિદ્યયા વિન્દતેઽમૃતમ્ ॥ ૨૫॥

પુંસ્કોકિલકલક્વાણકોમલાલાપશાલિનિ ।
ભદ્રાણિ કુરુ મે માતર્દુરિતાનિ પરાસુવ ॥ ૨૬॥

અન્તેવાસિન્નસ્તિ ચેત્તે મુમુક્ષા
વક્ષ્યે યુક્તિં મુક્તસર્વૈષણસ્સન્ ।
સદ્ભ્યઃ સાક્ષાત્ સુન્દરીં જ્ઞપ્તિરૂપાં
શ્રદ્ધાભક્તિજ્ઞાનયોગાદવેહિ ॥ ૨૭॥

ષોઢાન્યાસાદિદેવૈશ્ચ સેવિતા ચક્રમધ્યગા ।
કામેશમહિષી ભૂયઃ ષોડશી શર્મ યચ્છતુ ॥ ૨૮॥

શાન્તો દાન્તો દેશિકેન્દ્રં પ્રણમ્ય
તસ્યાદેશાત્તારકં મન્ત્રતત્ત્વમ્ ।
જાનીતે ચેદમ્બ ધન્યઃ સમાનં
નાતઃ પરં વેદિતવ્યં હિ કિઞ્ચિત્ ॥ ૨૯॥

ત્વમેવ કારણં કાર્યં ક્રિયા જ્ઞાનં ત્વમેવ ચ ।
ત્વામમ્બ ન વિના કિઞ્ચિત્ ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૩૦॥

પરાગમદ્રીન્દ્રસુતે તવાઙ્ઘ્રિ-
સરોજયોરમ્બ દધામિ મૂર્ધ્ના ।
અલઙ્કૃતં વેદ(/દેવ)વધૂશિરોભિ-
ર્યતો જાતો ભુવનાનિ વિશ્વા ॥ ૩૧॥

દુષ્ટાન્ દૈત્યાન્ હન્તુકામાં મહર્ષીન્
શિષ્ટાનન્યાન્ પાતુકામાં કરાબ્જૈઃ ।
અષ્ટાભિસ્ત્વાં સાયુધૈર્ભાસમાનાં
દુર્ગાં દેવીં શરણમહં પ્રપદ્યે ॥ ૩૨॥

દેવિ સર્વાનવદ્યાઙ્ગીં ત્વામનાદૃત્ય યે ક્રિયાઃ ।
કુર્વન્તિ નિષ્ફલાસ્તેષામદુગ્ધા ઇવ ધેનવઃ ॥ ૩૩॥

નાહં મન્યે દૈવતં માન્યમન્ય-
ત્ત્વત્પાદાબ્જાદમ્બિકે કુમ્ભજાદ્યાઃ ।
યે ધ્યાતારો ભક્તિસંશુદ્ધચિત્તાઃ
પરામૃતાત્ પરિમુચ્યન્તિ સર્વે ॥ ૩૪॥

કુર્વાણોઽપિ દુરારમ્ભાં સ્તવ નામાનિ શામ્ભવિ ।
પ્રજપન્નેતિ માયાન્તમતિમૃત્યું તરામ્યહમ્ ॥ ૩૫॥

કલ્યાણિ ત્વં કુન્દહાસપ્રકાશૈ-
રન્તર્ધ્વાન્તં નાશયન્તી ક્ષણેન ।
હન્તાસ્માકં ધ્યાયતાં ત્વત્પદાબ્જ-
મુચ્ચતિષ્ઠ મહતે સૌભગાય ॥ ૩૬॥

તિતીર્ષયા ભવામ્ભોધેર્હયગ્રીવાદયઃ પુરા ।
અપ્રમત્તા ભવત્પૂજાં સુવિદ્વાંસો વિતેનિરે ॥ ૩૭॥

મદ્વંશ્યા યે દુરાચારા યે ચ સન્માર્ગગામિનઃ ।
ભવત્યાઃ કૃપયા સર્વે સુવર્યન્તુ યજમાનાઃ ॥ ૩૮॥

શ્રીચક્રસ્થાં શાશ્વતૈશ્વર્યદાત્રીં
પૌણ્ડ્રં ચાપં પુષ્પબાણાન્દધાનામ્ ।
બન્ધૂકાભાં ભાવયામિ ત્રિનેત્રાં

તામગ્નિવર્ણાં તપસા જ્વલન્તીમ્ ॥ ૩૯॥

ભવાનિ તવ પાદાબ્જનિર્ણેજનપવિત્રિતાઃ
ભવામયપ્રશાન્ત્યૈ ત્વામપો યાચામિ ભેષજમ્ ॥ ૪૦॥

ચિદાનન્દસુધામ્ભોધેસ્તવાનન્દલવોઽસ્તિ યઃ
કારણેશૈસ્ત્રિભિસ્સાકં તદ્વિશ્વમુપજીવતિ ॥ ૪૧॥

નો વા યાગૈર્નૈવ પૂર્તાદિકૃત્યૈ-
ર્નો વા જપ્યૈર્નો મહદ્ભિસ્તપોભિઃ ।
નો વા યોગૈઃ ક્લેશકૃદ્ભિઃ સુમેધા
નિચાય્યેમાં શાન્તિમત્યન્તમેતિ ॥ ૪૨॥

પ્રાતઃ પાહિ મહાવિદ્યે મધ્યાહ્ને તુ મૃડપ્રિયે ।
સાયં પાહિ જગદ્વન્દ્યે પુનર્નઃ પાહિ વિશ્વતઃ ॥ ૪૩॥

બન્ધૂકાભૈર્ભાનુભિર્ભાસયન્તી
વિશ્વં શશ્વત્તુઙ્ગપીનસ્તનાર્ધા ।
લાવણ્યાબ્ધેઃ સુન્દરિ ત્વં પ્રસાદા-
દાયુઃ પ્રજાં રયિમસ્માસુ ધેહિ ॥ ૪૪॥

કર્ણાકર્ણય મે તત્ત્વં યા ચિચ્છક્તિરિતીર્યતે ।
ત્રિર્વદામિ મુમુક્ષૂણાં સા કાષ્ઠા સા પરગતિઃ ॥ ૪૫॥

વાગ્દેવીતિ ત્વાં વદન્ત્યમ્બ કેચિ-
લ્લક્ષ્મીર્ગૌરીત્યેવમન્યે વદન્તિ ।
શશ્વન્માતઃ પ્રત્યગદ્વૈતરૂપાં
શંસન્તિ કેચિન્નિવિદો જનાઃ ॥ ૪૬॥

લલિતેતિ સુધાપૂરમાધુરીચોરમમ્બિકે ।
તવ નામાસ્તિ યત્તેન જિહ્વા મે મધુમત્તમા ॥ ૪૭॥

યે સમ્પન્નાઃ સાધનૈસ્તૈશ્ચતુર્ભિઃ
શુશ્રૂષાભિર્દેશિકં પ્રીણયન્તિ ।
સમ્યગ્વિદ્વાઞ્શુદ્ધસત્ત્વાન્તરાણાં
તેષામેવૈતાં બ્રહ્મવિદ્યાં વદેત ॥ ૪૮॥

અભિચારાદિભિઃ કૃત્યાં યઃ પ્રેરયતિ મય્યુમે ।
તવ હુઙ્કારસન્ત્રસ્તા પ્રત્યક્કર્તારમૃચ્છતુ ॥ ૪૯॥

જગત્પવિત્રિ મામિકામપહરાશુ દુર્જરામ્ ।
પ્રસીદ મે દયા ધુને પ્રશસ્તિમમ્બ નસ્કૃધિ ॥ ૫૦॥

કદમ્બારુણમમ્બાયા રૂપં ચિન્તય ચિત્ત મે ।
મુઞ્ચ પાપીયસીં નિષ્ઠાં મા ગૃધઃ કસ્ય સ્વિદ્ધનમ્ ॥ ૫૧॥

ભણ્ડભણ્ડનલીલાયાં રક્તચન્દનપઙ્કિલઃ ।
અઙ્કુશસ્તવ તં હન્યાદ્યશ્ચ નો દ્વિષતે જનઃ ॥ ૫૨॥

રે રે ચિત્ત ત્વં વૃથા શોકસિન્ધૌ
મજ્જસ્યન્તર્વચ્મ્યુપાયં વિમુક્ત્યૈ ।
દેવ્યાઃ પાદૌ પૂજયૈકાક્ષરેણ
તત્તે પદં સઙ્ગ્રહેણ બ્રવીમ્યોમ્ ॥ ૫૩॥

ચઞ્ચદ્બાલાતપજ્યોત્સ્નાકલામણ્ડલશાલિને ।
ઐક્ષવાય નમો માતર્બાહુભ્યાં તવ ધન્વને ॥ ૫૪॥

તામેવાદ્યાં બ્રહ્મવિદ્યામુપાસે
મૂર્તૈર્વેદૈઃ સ્તૂયમાનાં ભવાનીમ્ ।
હન્ત સ્વાત્મત્ત્વેન યાં મુક્તિકામો
મત્વા ધીરો હર્ષશોકૌ જહાતિ ॥ ૫૫॥

શરણં કરવાણ્યમ્બ ચરણં તવ સુન્દરિ ।
શેપે ત્વત્પાદુકાભ્યાં મે નાન્યઃ પન્થા અયનાય ॥ ૫૬॥

રત્નચ્છત્રૈશ્ચામરૈર્દર્પણાદ્યૈ-
શ્ચક્રેશાનીં સર્વદોપચારયન્ત્યઃ ।
યોગિન્યોઽન્યાઃ શક્તયશ્ચાણિમાદ્યા
યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૫૭॥

દરિદ્રં માં વિજાનીહિ સર્વજ્ઞાસિ યતઃ શિવે ।
દૂરીકૃત્યાશુ દુરિતમથ નો વર્ધયારયિમ્ ॥ ૫૮॥

મહેશ્વરિ મહામન્ત્રકૂટત્રયકલેવરે ।
કાદિવિદ્યાક્ષરશ્રેણીમુશન્તસ્ત્વા હવામહે ॥ ૫૯॥

મૂલાધારાદૂર્ધ્વમન્તશ્ચરન્તીં
ભિત્ત્વા ગ્રન્થીન્મૂર્ધ્નિ નિર્યત્સુધાર્દ્રામ્ ।

પશ્યન્તસ્ત્વાં યે ચ તૃપ્તિં લભન્તે
તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૬૦॥

મહ્યં દ્રુહ્યન્તિ યે માતઃ ત્વદ્ધ્યાનાસક્તચેતસે ।
તાનમ્બ સાયકૈરેભિરવ બ્રહ્મદ્વિષો જહિ ॥ ૬૧॥

ત્વદ્ભક્તાનામમ્બ શાન્તૈષણાનાં
બ્રહ્મિષ્ઠાનાં દૃષ્ટિપાતેન પૂતઃ ।
પાપીયાનપ્યાવૃતઃ સ્વર્વધૂભિઃ
શોકાતિગો મોદતે સ્વર્ગલોકે ॥ ૬૨॥

સન્તુ વિદ્યા જગત્યસ્મિન્ સંસારભ્રમહેતવઃ ।
ભજેઽહં ત્વાં યયા વિદ્વાન્ વિદ્યયાઽમૃતમશ્નુતે ॥ ૬૩॥

વિદ્વન્મુખ્યૈર્વિદ્રુમાભં વિશાલ-
શ્રોણીશિઞ્જન્મેખલાકિઙ્કિણીકમ્ ।
ચન્દ્રોત્તંસં ચિન્મયં વસ્તુ કિઞ્ચિ-
દ્વિદ્ધિ ત્વમેતન્નિહિતં ગુહાયામ્ ॥ ૬૪॥

ન વિસ્મરામિ ચિન્મૂર્તિમિક્ષુકોદણ્ડશાલિનીમ્ ।
મુનયઃ સનકપ્રેષ્ઠાસ્તામાહુઃ પરમાં ગતિમ્ ॥ ૬૫॥

ચક્ષુઃપ્રેઙ્ખત્પ્રેમકારુણ્યધારાં
હંસજ્યોત્સ્નાપૂરહૃષ્યચ્ચકોરામ્ ।
યામાશ્લિષ્યન્મોદતે દેવદેવઃ
સા નો દેવી સુહવા શર્મ યચ્છતુ ॥ ૬૬॥

મુઞ્ચ વઞ્ચકતાં ચિત્ત પામરં ચાપિ દૈવતમ્ ।
ગૃહાણ પદમમ્બાયા એતદાલમ્બનં પરમ્ ॥ ૬૭॥

કા મે ભીતિઃ કા ક્ષતિઃ કિં દુરાપં
કામેશાઙ્કોત્તુઙ્ગપર્યઙ્કસંસ્થામ્ ।
તત્ત્વાતીતામચ્યુતાનન્દદાત્રીં
દેવીમહં નિરૃતિં વન્દમાનઃ ॥ ૬૮॥

ચિન્તામણિમયોત્તંસકાન્તિકઞ્ચુકિતાનને ।
લલિતે ત્વાં સકૃન્નત્વા ન બિભેતિ કુતશ્ચન ॥ ૬૯॥

તારુણ્યોત્તુઙ્ગિતકુચે લાવણ્યોલ્લાસિતેક્ષણે ।

તવાજ્ઞયૈવ કામાદ્યા માસ્માન્પ્રાપન્નરાતયઃ ॥ ૭૦॥

આકર્ણાકૃષ્ટકામાસસ્ત્રસઞ્જાતં તાપમમ્બ મે ।
આચામતુ કટાક્ષસ્તે પર્જન્યો વૃષ્ટિમાનિવ ॥ ૭૧॥

કુર્વે ગર્વેણાપચારાનપારા-
નદ્યપ્યમ્બ ત્વત્પદાબ્જં તથાપિ ।
મન્યે ધન્યે દેવિ વિદ્યાવલમ્બં
માતેવ પુત્રં બિભૃતાસ્વેનમ્ ॥ ૭૨॥

યથોપાસ્તિક્ષતિર્નસ્યાત્તવ ચક્રસ્ય સુન્દરિ ।
કૃપયા કુરુ કલ્યાણિ તથા મે સ્વસ્તિરાયુષિ ॥ ૭૩॥

ચક્રં સેવે તાવકં સર્વસિદ્ધ્યૈ
શ્રીમન્માતઃ સિદ્ધયશ્ચાણિમાદ્યાઃ ।
નિત્યા મુદ્રા શક્તયશ્ચાઙ્ગદેવ્યો
યસ્મિન્દેવા અધિ વિશ્વે નિષેદુઃ ॥ ૭૪॥

સુકુમારે સુખાકારે સુનેત્રે સૂક્ષ્મમધ્યમે ।
સુપ્રસન્ના ભવ શિવે સુમૃડીકા સરસ્વતી ॥ ૭૫॥

વિદ્યુદ્વલ્લીકન્દલીં કલ્પયન્તીં
મૂર્તિં સ્ફૂર્ત્યા પઙ્કજં ધારયન્તીમ્ ।
ધ્યાયન્ હિ ત્વાં જાયતે સાર્વભૌમો
વિશ્વા આશાઃ પૃતનાઃ સઞ્જયન્જયન્ ॥ ૭૬॥

અવિજ્ઞાય પરાં શક્તિમાત્મભૂતાં મહેશ્વરીમ્ ।
અહો પતન્તિ નિરયેષુ યે કે ચાત્મહનો જનાઃ ॥ ૭૭॥

સિન્દૂરાભૈસ્સુન્દરૈરંશુવૃન્દૈઃ
લાક્ષાલક્ષ્મ્યાં મજ્જયન્તીં જગન્તિ ।
હેરમ્બામ્બ ત્વાં હૃદા લમ્બતે ય-
સ્તસ્મૈ વિશઃ સ્વયમેવાનમન્તે ॥ ૭૮॥

તવ તત્ત્વં વિમૃશતાં પ્રત્યગદ્વૈતલક્ષણમ્ ।
ચિદાનન્દઘનાદન્યન્નેહ નાનાસ્તિ કિઞ્ચન ॥ ૭૯॥

કણ્ઠાત્કુણ્ડલિનીં નીત્વા સહસ્રારં શિવે તવ ।
ન પુનર્જાયતે ગર્ભે સુમેધા અમૃતોક્ષિતઃ ॥ ૮૦॥

ત્વત્પાદુકાનુસન્ધાનપ્રાપ્તસર્વાત્મતાદૃશિ ।
પૂર્ણાહન્તૃતિમત્યસ્મિન્ન કર્મ લિપ્યતે નરે ॥ ૮૧॥

તવાનુગ્રહનિર્ભિન્નહૃદયગ્રન્થિરદ્વિજે ।
સ્વાત્મત્વેન જગન્મત્વા તતો ન વિજુગુપ્સતે ॥ ૮૨॥

કદા વસુદલોપેતે ત્રિકોણનવકાન્વિતે ।
આવાહયામિ ચક્રે ત્વાં સૂર્યાભાં શ્રિયમૈશ્વરીમ્ ॥ ૮૩॥

હ્રીમિત્યેકં તાવકં વાચકાર્ણં
યજ્જિહ્વાગ્રે દેવિ જાગર્તિ કિઞ્ચિત્ ।
કો વાયં સ્યાત્કામકામસ્ત્રિલોક્યાં
સર્વેઽસ્મૈ દેવાઃ બલિમાવહન્તિ ॥ ૮૪॥

નાકસ્ત્રીણાં કિન્નરીણાં નૃપાણા-
પ્યાકર્ષિ ચેતસા ચિન્તનીયમ્ ।
ત્વત્પાણિસ્થં કુઙ્કુમાભં શિવે યં
દ્વિષ્મસ્તસ્મિન્પ્રતિ મુઞ્ચામિ પાશમ્ ॥ ૮૫॥

નૂનં સિંહાસનેશ્વર્યાસ્તવાજ્ઞાં શિરસા વહન્ ।
ભયેન પવમાનોઽયં સર્વા દિશોઽનુવિધાવતિ ॥ ૮૬॥

ત્રિકાલાઢ્યાં ત્રિહૃલ્લેખાં દ્વિહંસસ્વરભૂષિતામ્ ।
યો જપત્યમ્બ તે વિદ્યાં સોઽક્ષરઃ પરમઃ સ્વરાટ્ ॥ ૮૭॥

દારિદ્ર્યાબ્ધૌ દેવિ મગ્નોઽપિ શશ્વ-
દ્વાચા યાચે નાહમમ્બ ત્વદન્યમ્ ।
તસ્માદસ્મદ્વાઞ્છિતં પૂરયૈત-
દુષા સા નક્તા સુદુઘેવ ધેનુઃ ॥ ૮૮॥

યો વા યદ્યત્કામનાકૃષ્ટચિત્તઃ
સ્તુત્વોપાસ્તે દેવિ તે ચક્રવિદ્યામ્ ।
કલ્યાણાનામાલયઃ કાલયોગાત્
તં તં લોકં જયતે તાંશ્ચ કામાન્ ॥ ૮૯॥

સાધકસ્સતતં કુર્યાદૈક્યં શ્રીચક્રદેહયોઃ ।
તથા દેવ્યાત્મનોરૈક્યમેતાવદનુશાસનમ્ ॥ ૯૦॥

હસ્તામ્ભોજપ્રોલ્લસચ્ચામરાભ્યાં
શ્રીવાણીભ્યાં પાર્શ્વયોર્વીજ્યમાનામ્ ।
શ્રીસામ્રાજ્ઞિ ત્વાં સદા લોકયેયં
સદા સદ્ભિઃ સેવ્યમાનાં નિગૂઢામ્ ॥ ૯૧॥

ઇષ્ટાનિષ્ટપ્રાપ્તિવિચ્છિત્તિહેતુઃ
સ્તોતું વાચાં ક્લૃપ્તિરિત્યેવ મન્યે ।
ત્વદ્રૂપં હિ સ્વાનુભૂત્યૈકવેદ્યં
ન ચક્ષુષા ગૃહ્યતે નાપિ વાચા ॥ ૯૨॥

હરસ્વરૈશ્ચતુર્વર્ગપ્રદં મન્ત્રં સબિન્દુકમ્ ।
દેવ્યા જપત વિપ્રેન્દ્રા અન્યા વાચો વિમુઞ્ચથ ॥ ૯૩॥

યસ્તે રાકાચન્દ્રબિમ્બાસનસ્થાં
પીયૂષાબ્ધિં કલ્પયન્તીં મયૂખૈઃ ।
મૂર્તિં ભક્ત્યા ધ્યાયતે હૃત્સરોજે
ન તસ્ય રોગો ન જરા ન મૃત્યુઃ ॥ ૯૪॥

તુભ્યં માતર્યોઽઞ્જલિં મૂર્ધ્નિ ધત્તે
મૌલિશ્રેણ્યા ભૂભુજસ્તં નમન્તિ ।
યઃ સ્તૌતિ ત્વામમ્બ ચિદ્વલ્લિવાચા
તં ધીરાસઃ કવય ઉન્નયન્તિ ॥ ૯૫॥

વૈરિઞ્ચોઘૈર્વિષ્ણુરુદ્રેન્દ્રવૃન્દૈઃ
દુર્ગાકાલીભૈરવીશક્તિસંઙ્ઘૈઃ ।
યત્રે(ન્ત્રે)શિ ત્વં વર્તતે(સે) સ્તૂયમાના
ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકમ્ ॥ ૯૬॥

ભૂત્યૈ ભવાનિ ત્વાં વન્દે સુરાઃ શતમખાદયઃ ।
ત્વામાનમ્ય સમૃદ્ધાઃ સ્યુરાયો ધામાનિ દિવ્યાનિ ॥ ૯૭॥

પુષ્પવત્ફુલ્લતાટઙ્કાં પ્રાતરાદિત્યપાટલામ્ ।
યસ્ત્વામન્તઃ સ્મરત્યમ્બ તસ્ય દેવા અસન્વશે ॥ ૯૮॥

વશ્યે વિદ્રુમસઙ્કાશાં વિધાયાં વિશદપ્રભામ્ ।
ત્વામમ્બ ભાવયેદ્ભૂત્યૈ સુવર્ણાં હેમમાલિનીમ્ ॥ ૯૯॥

વામાઙ્ગસ્થામીશિતુર્દીપ્યમાનાં

ભૂષાવૃન્દૈરિન્દુરેખાવતંસામ્ ।
યસ્ત્વાં પશ્યન્ સતતં નૈવ તૃપ્તઃ
તસ્મૈ ચ દેવિ વષડસ્તુ તુભ્યમ્ ॥ ૧૦૦॥

નવનીપવનીવાસલાલસોત્તમમાનસે ।
શૃઙ્ગારદેવતે માતઃ શ્રિયં વાસય મે કુલે ॥ ૧૦૧॥

ભક્ત્યાભક્ત્યા વાપિ પદ્યાવસાન-
શ્રુત્યા સ્તુત્યા ચૈતયા સ્તૌતિ યસ્ત્વામ્ ।
તસ્ય ક્ષિપ્રં ત્વત્પ્રસાદેન માતઃ
સત્યાઃ સન્તુ યજમાનસ્ય કામાઃ ॥ ૧૦૨॥

બાલિશેન મયા પ્રોક્તમપિ વાત્સલ્યશાલિનોઃ ।
આનન્દમાદિદમ્પત્યોરિમા વર્ધન્તુ વાઙ્ગિરઃ ॥ ૧૦૩॥

માધુરીસૌરભાવાસચાપસાયકધારિણીમ્ ।
દેવીં ધ્યાયન્ પઠેદેતત્સર્વકામાર્થસિદ્ધયે ॥ ૧૦૪॥

સ્તોત્રમેતત્પ્રજપતસ્તવ ત્રિપુરસુન્દરિ ।
અનુદ્વીક્ષ્ય ભયાદ્દૂરં મૃત્યુર્ધાવતિ પઞ્ચમઃ ॥ ૧૦૫॥

યઃ પઠતિ સ્તુતિમેતાં વિદ્યાવન્તં તમમ્બ ધનવન્તમ્ ।
કુરુ દેવિ યશસ્વન્તં વર્ચસ્વન્તં મનુષ્યેષુ ॥ ૧૦૬॥

યે શૃણ્વન્તિ સ્તુતિમિમાં તવ દેવ્યનસૂયકાઃ ।
તેભ્યો દેહિ શ્રિયં વિદ્યામુદ્ગર્ચ ઉત્તનૂબલમ્ ॥ ૧૦૭॥

ત્વામેવાહં સ્તૌમિ નિત્યં પ્રણૌમિ
શ્રીવિદ્યેશાં વચ્મિ સઞ્ચિન્તયામિ ।
અધ્યાસ્તે યા વિશ્વમાતા વિરાજો
હૃત્પુણ્ડરીકં વિરજં વિશુદ્ધમ્ ॥ ૧૦૮॥

શઙ્કરેણ રચિતં સ્તવોત્તમં
યઃ પઠેજ્જગતિ ભક્તિમાન્નરઃ ।
તસ્ય સિદ્ધિરતુલા ભવેદ્ધ્રુવા
સુન્દરી ચ સતતં પ્રસીદતિ ॥ ૧૦૯॥

યત્રૈવ યત્રૈવ મનો મદીયં
તત્રૈવ તત્રૈવ તવ સ્વરૂપમ્ ।

યત્રૈવ યત્રૈવ શિરો મદીયં
તત્રૈવ તત્રૈવ પદદ્વયં તે ॥ ૧૧૦॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ ત્રિપુરસુન્દરીવેદપાદસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by P. R. Ramamurthy

*tripurasundarIvedapAdastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*